International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2024; 1(4): 50-53
© 2024 IJMH
www.themultijournal.com
Received: 21-10-2024
Accepted: 23-10-2024
Publish : 28-10-2024

**डॉ. प्रीतमसिंहः**
अतिथिशिक्षकः, दर्शनविभागः
सनातनधर्म-आदर्शसंस्कृतमहा-,
विद्यालयः, डोहगी, ऊना ,
हिमाचलप्रदेशः-174307.

**Correspondence:**
**डॉ. प्रीतमसिंहः**
अतिथिशिक्षकः, दर्शनविभागः
सनातनधर्म-आदर्शसंस्कृतमहा-,
विद्यालयः, डोहगी, ऊना ,
हिमाचलप्रदेशः-174307.

# साङ्ख्यकारिकायाः टीकासु पाठभेदः (पाठान्तरम्)

**डॉ. प्रीतमसिंहः**

पाठभेदस्य (पाठान्तरस्य) पाण्डुलिपेरवबोधनाय मुख्यं स्थानमस्ति । एकस्यैव ग्रन्थस्य पाण्डुलिपेर्वा विभिन्नेषु संस्करणेषु (प्रतिलिपिग्रन्थेषु) प्राप्तेषु विविधेषु पाठेषु भेदः पाठभेद उच्यते । अस्यापरं नाम पाठान्तरम् अप्यस्ति । अयं पाठभेदः कस्मिन्नपि विशेषे स्थले भिन्न-शब्द-क्रम-वाक्य-क्रियादीनाम-वस्थितिः अस्ति ।

पाठभेदोऽयं लिङ्ग-वचन-कारक-शब्द-अर्थ-वाक्यादिदृष्ट्या भवति । पाठभेदे भावप्रधानमपि भवितुमर्हति । सङ्क्षेपरूपेण पञ्चसु साहित्येषु पाठभेदः प्राप्यते तस्मात् कारणात् पाठभेदस्य पञ्च प्रकाराणि इति वक्तुं शक्यते, एतानि सन्ति - दृष्टसाहित्यम्, उत्कीर्णसाहित्यम्, प्रोक्तसाहित्यम्, कृतसाहित्यं श्रुतसाहित्यम् चेति ।

1. **दृष्टसाहित्यम्** - यस्य साहित्यस्य आत्मना प्रत्यक्षदर्शनमभवत् तत्साहित्यं दृष्टसाहितमुच्यते । भारतीयपरम्पराऽनुसारं वेदाः अपौरुषेयाः इति मन्यते । ऋषिभिर्वेदानां द्रष्टृत्वमभवत् । मन्त्रद्रष्टारः ऋषयः । (वेदस्य संहिताभागान् अतिरिच्य उपनिषत्सु पाठभेदः प्राप्यते ।)

2. **उत्कीर्णसाहित्यम्** - राज्ञः अशोकस्य कालात् (272 ईस्वीपूर्वतः) 1800 ईस्वीपर्यन्तं शैललेख-शिलालेख-ताम्रलेखादिषु यत्साहित्यमाप्यते तदुत्कीर्णसाहित्यमुच्यते । अस्मिन् साहित्ये यः पाठः प्राप्यते तत्र पाठान्तरमस्ति । उत्कीर्णपाठेषु समय-लेखक-रीति-लोभादिकारणेभ्यः नैकाः विकृतयः सञ्जाताः । पाठालोचनेन एतासां विकृतीनां निवारणं कृत्वा सम्यक् पाठभेदः विद्वद्भिः कर्त्तव्यः ।

3. **प्रोक्तसाहित्यम्** - रामायणमहाभारतपुराणानां साहित्यं प्रोक्तसाहित्यमुच्यते । अनादिकालातः अस्य साहित्यस्य पाठः प्रवचनेनास्ति । प्रत्येकं पारायणे कथाकारैस्तत्र बहुविधानि परिवर्तनानि प्रेक्षिपतानि तस्मात् तत्र मूलपाठो यथावन्नास्ति । पाठोऽयं अनेककर्तृपाठः उच्यते ।

4. **कृतसाहित्यम्** - कविना लेखकेन वा कृतं साहित्यं कृतसाहित्यमस्ति । यथा महाकविभास-कालिदास-माघ-भारवि-मम्मट-आनन्दवर्धन-दण्डि-वामन-शङ्कराचार्यादिभिः तत्तट्टीकारैश्च रचितं साहित्यमिदमस्ति । अत्रापि टीकाकारैः टङ्कणकारैर्वा मूलकृतौ पाठभेद आगतः ।

5. **श्रुतसाहित्यम्** - भगवन्महावीरबुद्धादिभिरुक्तोपदेशं श्रुत्वा जीवकालेऽनुचरणेन प्रजाभिः साहित्यमिदं श्रुतसाहित्यमुच्यते । भगवता उपदेशोऽयं हस्तेन न लिखितम्, अपि तु वचनेनोपदिष्टः । परञ्च श्रोतृभिः वचनस्य नैकानि अर्थानि नैका शब्दभेदाश्च स्वीकृता । अतोऽत्रापि पाठभेदोऽभवत् । बौद्धस्य चतस्रः बौद्धसङ्गितयः पाठभेदादेवाभवत् ।

**पाठान्तरस्य कारणानि** - पाठभेदस्य पाठान्तरस्य वा नैकानि कारणानि प्राप्यन्ते अधुना । यथा-

1. **आर्षग्रन्थत्वम्** - गीताया भाषा छन्दरचना च आर्षरूपेण (प्राचीनरूपेण) उपलभ्यते । काशीनाथपन्तानुसारम् अन्त[1]-भाषा[2]-ब्रह्मा[3]-योगपदानां पादपूरकानां ह-आदिपदानां प्रयोगः गीतायां यस्मिन्नर्थे विद्यते तस्मिन्नेवार्थे शब्दप्रयोगाः कालिदासप्रभृत्तिकाव्येषु न प्राप्यन्ते ।

अन्यत्रापि यथा गीतायां 'नमस्कृत्वा'[4] इति अपाणिनीयः प्रयोगः प्राप्यते अथ वा 'शक्य अहम्'[5] इत्यपाणिनीया सन्धिरपि विद्यते । एवमेव 'सेनानीनामहं स्कन्दः' इत्यत्र 'सेनानीनाम्' इत्यत्र

षष्ठीविभक्तेः प्रयोगः पाणिन्यनुसारं शुद्धो नास्ति । गीतायाः विश्वरूपदर्शनयोगनामैकादशाध्यायस्य षट्त्रिंशत्श्लोकान् अभिलक्ष्य सिद्धमपि भवति यत् गीता आर्षरचना अस्ति हि एतेषां श्लोकानां प्रत्येकं चरणे एकादशाक्षराणि सन्ति परञ्च गणानां कोऽपि नियमो नास्ति ह्यत्र एकः गण इन्द्रवज्रायुक्तोऽस्ति, द्वितीयः गण उपेन्द्र-वज्रयुतो विद्यते कुत्रचिच्च तृतीयः गणः शालिनीयुक्तः कुत्रचित् चतुर्थश्च अन्यतरोऽस्ति । प्रतिलिपिकारः अथ वा टीकाकार अत्र आर्षवाङ्मये पाणिनिनियमानुसारं प्रयोगं करोति अथ वा स्वेच्छया पदानां प्रयोगं करोति यस्मात् पाठान्तरमायाति ।

**2. अज्ञानम् -** कस्यापि विषयस्य पर्याप्तज्ञानाभावे प्रतिलिपिकारः, ग्रन्थकारः वा पदानां सम्यग्ज्ञानं विना अनर्थकमर्थं प्रतिलिपौ प्रयुज्यति तस्मात् पाठान्तरं (पाठभेदः) भवति ।

**3. पाण्डुलिपेर्शुद्धलेखनम्-** यदि पाण्डुलिपौ लिपिकारेण स्पष्टाक्षरेषु अथ वा शुद्धाऽक्षरेषु न लिखितश्चेत् पाठभेदो भवति । तदपि पाण्डुलिपौ अक्षरचित्राणि स्पष्टरूपेण न दृश्यन्ते चेत्तदपि प्रतिलिपेर्लेखने पाठभेदस्य अत्यधिका सम्भावना भवति ।

**4. द्रव्यलोभः-** प्राचीनकाले राज्ञः अथ वा समुदायः विशेषं प्रलिपिकारं धनादिभिर्लोभोपहतेन कार्यार्थमादेशं दत्तवन्तः स्म यस्मात् पाठभेदस्य अत्यधिका सम्भावना भवति स्म ।

एतदतिरिच्यं प्रतिलिपिप्रमाद-अल्पज्ञान-पूर्वधारणादीनि नैकानि कारणान्यपि सन्ति यैः पाठान्तरं पाठभेदो व भवति ।

**साङ्ख्यकारिकायाष्टीकासु पाठभेदः -** श्रीमदीश्वरकृष्णेन वि रचिता 'साङ्ख्यकारिका' साङ्ख्यदर्शनस्य प्रकरणग्रन्थोऽस्ति । अस्य ग्रन्थस्य उपजीव्यो ग्रन्थः पञ्चशिखाचार्यप्रणीतः 'षष्ठीतन्त्रम्' अस्ति। ग्रन्थोऽयं आर्याछन्दोबद्धोऽस्ति । अस्य ग्रन्थस्योपरि नैकाः टीकास्सन्ति । यथा–

| टीका | टीकाकारः | समयः |
|---|---|---|
| जयमङ्गला | आचार्यशङ्करः | 700 ईस्वी |
| गौडपादभाष्यम् | आचार्यगौडपादः | 700 ईस्वी |
| साङ्ख्यतत्त्वकौमुदी | वाचस्पतिमिश्रः | 700 ईस्वी |
| युक्तिदीपिका | ईश्वरकृष्णः / वाचस्पतिमिश्रः | 700 ईस्वी |
| माठरवृत्तिः | आचार्यमाठरः | 1000 ईस्वी |

एतासु सर्वासु टीकासु मूलपाठे किञ्चित् पाठान्तरमस्ति यस्य मुख्यं कारणं ग्रन्थकारैः स्वबौद्धिकार्थस्याभिप्रेतत्वमस्ति । कारिकाऽनुसारं पाठान्तरमग्रलिखितमस्ति -

दुःखत्राभिघाताज्जिज्ञासा **तदपघातके** हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात् ।।[6]

प्रस्तुतेयं कारिका साङ्ख्यकारिकायां श्रीमदीश्वरकृष्णेन रचिता प्रथमा कारिकाऽस्ति । कारिकायामस्यां मङ्गलवाचि पदं 'तदप-घातके' इत्यस्ति । साङ्ख्याकारिकायाः टीकाकाराणां मतेषु 'अपघा-तके' इति पदमधिकृत्य पाठभेदः प्राप्यते ।

साङ्ख्यतत्त्वकौमुद्याः प्रवर्त्तक आचार्यवाचस्पतिमिश्रः 'अपघातके' इति पदस्थाने 'अभिघातके' इति पदं स्वीकृतवान् । अभि उपसर्गपूर्वकं हन् धातोः घञ्-प्रत्ययेन 'अभिधातः' इति पदं निष्पद्यते। अभितः बुद्धितत्त्वपुरुषौ हन्ति गच्छतीति अभिघातः । वाचस्पतिमिश्रेण साङ्ख्यतत्त्वकौमुद्याम् अभिघातपदस्य विशिष्टः अर्थः स्वीकृतः। तत्र साङ्ख्यतत्त्वकौमुद्यामुक्तम् – दुःखत्रये-णान्तःकरणवर्तिना चेतनाशक्तेः प्रतिकूलतया असम्बन्धोऽभिघातः ।[7]

जयमङ्गलायाः रचनाकार आचार्यशङ्करः 'अपघातके' इति पदस्थाने 'अभिघातके' इति पदं स्वीकृतवान् । अभि उपसर्गपूर्वकं हन् धातोः घञ्-प्रत्ययेन 'अभिधातः' इति पदं निष्पद्यते । अभितः बुद्धितत्त्वपुरुषौ हन्ति गच्छतीति अभिघातः । ग्रन्थकारेण अभि-घातपदस्य अर्थः 'पीडनम्' इति कृतं तथा पञ्चमीविभक्ति हेत्वर्थे स्वीकृता ।[8]

गौडपादभाष्यटीकाकार आचार्यगौदपादः 'अपघातके' इति पद-स्थाने 'अवघातके' इति पदं स्वीकृतवान् । अव् उपसर्गपूर्वकं हन् धातोः घञ्-प्रत्ययेन 'अभिधातः' इति पदं निष्पद्यते । अवघातयति अपनयतीति अवघातः तस्मिन् अवघातके इति गौडपादः । स्वामि-नारायणभाष्ये च अभिघातपदस्य व्याख्या समीचीना परिलक्ष्यते । तत्रोक्तम् - दुःखानां त्रयं दुःखत्रयम्, तस्य अभिघातात् प्रतिकूल-वेदनीयतात्मकसम्बन्धात् चेतनस्येतिशेषः ।

**अविवेक्यादिः सिद्धस्त्रैगुण्यात्तद्विपर्ययाऽभावात्** ।
कारणगुणात्मकत्वात् कार्यस्याऽव्यक्तमपि सिद्धम् ॥[9]

कुत्रचित् टीकाग्रन्थे **'तद्विपर्ययाऽभावात्'** इति पदस्थाने **'तद्विपर्य-येऽभावात्'** इति पाठभेदः प्राप्यते । आचार्यगौडपादमते तस्य अविवेक्यादेः विपर्ययः तद्विपर्ययः, तस्य अभावः तद्विपर्ययाभावः, तस्मात् तद्विपर्ययाऽभावात् इति पाठान्तरमस्ति । सुबोधिनी-टीकाकारमते व्यक्तमव्यक्तञ्च नाविवेकित्वादिमद्भिन्नं त्रैगुण्याऽभावे अभावात् अर्थात् अस्यां टीकायां **'तद्विपर्ययाऽभावात्'** इति पाठान्तरं समीचीनमस्ति ।

अस्यामेव कारिकायां टीकाग्रन्थे **'अविवेक्यादिः सिद्धः'** इति पदस्थाने **अविवेक्यादिः सिद्धिः** इति पाठभेदः प्राप्यते । अत्र योऽयं विवेक्यादिर्गुणः स त्रैगुण्यान्महदादौ व्यक्तेन अयं सिद्धयति इति गौडपादभाष्ये लिखितमस्ति । युक्तिप्रमाणाभ्यां वस्तुसिद्धिर्भवति इति नियमः, अतः **अविवेक्यादिः सिद्धिः** इति पाठभेदः सम्यगस्ति मे मते ।

सङ्घातपरार्थत्वात् त्रिगुणादिविपर्यादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥[10]

विलसनमहोदयः कारिकायामस्यां 'सङ्घात' इति पदस्थाने 'संहत' इति पदं स्वीकृतवान् ।[11] महोदयस्य कल्पनेयं साङ्ख्यसूत्रस्य **संहतपरार्थत्वात्**[12] इति सूत्रे आधारिता अस्ति । अस्य पदस्य प्रयोग यद्यपि पाठभेदे कस्यामपि टीकायां नास्ति एवञ्च अस्य पदस्य प्रयोगेन छन्दभङ्गोऽपि भवति ।

पुरुषस्य **दर्शनार्थं कैवल्यार्थं** तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥[13]

अस्याः कारिकायाः पूर्वार्धं क्रमं विपरीतरूपे आचार्यवाचस्पतिः साङ्ख्यतत्त्वकौमुद्यां स्वीकृतवान् । तन्मते पुरुषस्य कैवल्यार्थं दर्शनार्थं तथा प्रधानस्य इति पाठभेदः विद्यते ।

बुद्धीन्द्रियाणि चक्षुः **श्रोत्रघ्राणरसनस्पर्शकानि** ।
**वाक्पाणिपादपायूपस्थानि** कर्मेन्द्रियाण्याहुः ॥[14]

युक्तिदीपिकायां कारिकाया अस्याः द्वितीये चरणे कर्ण-त्वक्-चक्षू-रसन-नासिकाख्यानि' इति पाठ उपलभ्यते । माठरवृत्तौ श्रोत्र-त्वक्-चक्षुरसन-नासिकाख्यानि' इति पाठः सम्प्राप्तः । एवमेव कारिका-यास्तृतीये चरणे युक्तिदीपिकायां वाक्पाणिपादपायूपस्थाः' इति पाठः विद्यते । माठरवृत्ति-सुवर्णसप्तति-जयमङ्गलासु वाक्पाणिपाद-पायूपस्थान्' इति पाठः सम्प्राप्तः ।

छन्दोरचनादृष्ट्या ज्ञानेन्द्रियाणां क्रमः श्रोत्र-त्वक्-चक्षु-रसना-घ्राणमिति समीचीनः । 'उपस्थम्' पदं वस्तुतः नपुंसकलिङ्गमस्ति परञ्च सुवर्णसप्तति-जयमङ्गलासु उपस्थन् इति पदस्य प्रयोगात् पुंल्लिङ्गं रूपं सिद्धम् ।

उभयात्मकमत्र मनः सङ्कल्पमिद्रियञ्च साधर्म्यात् ।

गुणपरिणामविशेषन्नानात्वं **बाह्यभेदा**श्च ।।[15]

आचार्यमाठरो माठरवृत्तौ 'बाह्यभेदाः' इति पदस्थाने 'ग्राह्यभेदाः' इति पाठान्तरं स्वीकृतवान् । पाठान्तरमिदमुचितमपि प्रतीयते हि उत्तरार्द्धे इन्द्रियाणां नानात्वप्रतिपादने हेतू द्वे – गुणपरिणाम-विशेषात् ग्राहभेदात् (ग्राहकेन्द्रियाणामप्यनेकभेदात्) युक्तियुक्तौ प्रतीयेते । एकादशेन्द्रियाणां ग्राह्यभेदाः अनेके सन्ति अतः तेषाम् अनेकविषयाणां ग्राहकानि इन्द्रियाणि अपि भेदयुक्तानि अवश्यम् एव भवेयुः ।

**रूपादिषु** पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।

वचनाऽऽदानविहरणोत्सर्गाऽऽनन्दाश्च पञ्चानाम् ॥[16]

कुत्रचित् संस्करणेषु 'रूपादिषु' इति पदस्थाने 'शब्दादिषु' इति पाठाभेदोऽप्याप्यते । स च उत्पत्तिक्रमानुसारमस्ति हि उत्पत्तिक्रमे शब्दस्य प्राथम्येन जायमानत्वात् । किन्तु नायं क्रमः समादरणीयः हि षड्-विंशतिसङ्ख्याककारिकायां ज्ञानेन्द्रियपरैगणने चक्षुरिन्द्रियस्य प्रथमं ग्रहणं कृतम्, तद्वदत्रापि तस्य विषयस्य रूपस्य प्रथमं निरूपणं समुचितं प्रतिभाति ।

**स्वालक्षण्यं** वृत्तिस्त्रस्य सैषा भवत्यासामान्या ।

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥[17]

आचार्यमाठरगौडपादाभ्यां 'स्वालक्षण्यम्' इति पदस्थाने 'स्वाल-क्षण्या' इति पाठान्तरं स्वीकृत्य पदमेनं वृत्तेर्विशेषणरूपे स्वीकृतम् । आचार्ययोर्मतेयोः - स्वलक्षणस्वभावा 'स्वलक्षण्या' इति अभिप्रायः । परञ्च वाचस्पतिमिश्रः साङ्ख्यतत्त्वकौमुद्यां 'स्वालक्षण्यम्' इति पाठान्तरं स्वीकृतान्, तन्मते - स्वमसाधारणं लक्षणं येषां तानि स्वलक्षणानि महदहङ्कारमनांसि, तेषां भावः स्वालक्षण्यम् ।

युगपच्चतुष्ट्यस्य **तु** वृत्तिः क्रमश्च तस्य निर्दिष्टा ।

दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥[18]

कारिकायां प्रयुक्ते 'तु' इति पदस्थाने 'हि' इति पाठभेदम् आचार्यमाठरः अङ्गीकृतवान्।

स्वां स्वां प्रतिपद्यन्ते **परस्पराकूतहेतुकां** वृत्तिम् ।

पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥[19]

जयमङ्गलकारः 'परस्पराकूतहेतुकाम्'[20] इति पदस्थाने 'परस्प-राकूतहेतुकीम्' इति पाठान्तरमङ्गीकृतवान् । आचार्यमते परस्परस्य यदाकूतं स्ववृत्तिभोगः तदेव हेतुः । तत्रभूतां परस्पराकूतहैतुकीं वृत्तिं चत्वारि करणानि प्रतिपाद्यन्ते ।

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि ।

वाग्भवति शब्दविषया शेषाणि **तु पञ्चविषयाणि** ॥[21]

कारिकायां प्रयुक्ते 'तु' इति पदस्थाने अपि' इति पाठभेदम् माठ-रवृत्ति-युक्तिदीपिकाकारौ अङ्गीकृतवन्तौ । कस्मिंश्चित् संस्करणे 'पञ्चविषयाणि' इति पदस्थाने 'पञ्चविषयीणी' इति पाठभेदो-ऽप्युपलभ्यते ।

सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः ।

सैव च विशिनष्टि **पुनः** प्रधानपुरुषान्तरं सूक्ष्मम् ।।[22]

कारिकायां प्रयुक्ते 'पुनः' इति पदस्थाने 'ततः' इति पाठभेदम् आचार्यमाठरः अङ्गीकृतवान् । येन प्रकृतिपुरुषयोर्भेदस्य प्रकाशनपूर्वं बुद्धिना प्रतिपादितस्योपभोगस्यानिवार्यतायाः कथनं भवति । 'पुनः' इति शब्दपाठस्तु बुद्धिः पुरुषोपभोगसाधिका, सा एव तम् अपवर्ग-बोधम् अपि कारयति इति अभिप्रायोऽस्ति ।

**आध्यात्मिक्य**श्चतस्त्रः प्रकृत्युपादानकालभागाख्याः ।

बाह्याः विषयोपरमात्मञ्च नव तुष्ट्योऽभिमताः ॥[23]

कारिकायां प्रयुक्ते 'आध्यात्मिक्यः' इति पदस्थाने 'आध्यात्मिकाः' इति पदस्य पाठान्तरं सम्यगस्ति इति मे मतं हि द्वितीये चरणे भागपदस्यार्थग्रहणमनेनैव 'आध्यात्मिकाः' पदेन भवति। परञ्चायम-पाणिनीयः प्रयोगः हि अध्यात्मादेष्ठञिष्यते इति वार्तिकेन ठञि कृते टिट्ढादित्वात् ङीपः प्रसक्ते टापोऽप्रसङ्गात् ।

अष्टविकल्पो दैवस्तैर्यग्योनश्चपञ्चधा भवति ।

**मनुष्य**श्चैकविधः समासतो भौतिकः सर्गः ।।५३

कारिकायां प्रयुक्ते तृतीयचरणे 'मनुष्यः' इति पदस्थाने 'मानुषकः' इति पाठभेदम् आचार्यमाठरगौडपादौ अङ्गीकृतवन्तौ । अत्रैव 'मानुष्यः' इति जयमङ्गलाकारेण आचार्यशङ्करेण स्वीकृतं पाठा-न्तरम् ।

**तत्र** जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः ।

लिङ्गस्याऽविनिवृत्तेस्तस्माद् दुःखं **स्वभावेन** ॥[24]

कारिकायां प्रयुक्ते प्रथमे चरणे 'तत्र' इति पदस्थाने 'अत्र' इति पाठभेदम् आचार्यमाठरः अङ्गीकृतवान् हि अस्य पदस्य अर्थः पूर्वोक्तास्त्रयो लोकाः (उत्तममध्यमाऽधमभेदात्) अस्ति । अत्रैव कारिकायां प्रयुक्ते चतुर्थे चरणे 'स्वभावेन' इति पदस्थाने 'समासेन' इति पाठभेदम् आचार्यमाठरः अङ्गीकृतवान् हि अस्य पदस्य अर्थः अस्ति यत् वस्तुतो लिङ्गशरीरमेव दुःखानुभवे सङ्क्षेपे मूलकारण-मस्ति ।

इत्येषः प्रकृतिकृतौ महदादि**विशेष**भूतपर्यन्तः ।

प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥[25]

कारिकायां प्रयुक्ते द्वितीये चरणे 'विशेष' इति पदस्थाने 'विषयः' इति पाठभेदम् आचार्यमाठरः स्वीकृतवान् हि विशेषपदमत्र स्थूलार्थे प्रयुक्तम् ।

तस्मान्न बध्यते**ऽद्धा** न मुच्यते नापि संसरति कश्चित् ।

संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ।।[26]

कारिकायां प्रयुक्ते प्रथमे चरणे 'अद्धा' इति पदस्थाने 'असौ' 'नापि' इति पाठभेदौ अपि प्राप्येते ।

तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः **सुस्थः** ॥[27]

कारिकायां चतुर्थे चरणे प्रयुक्ते 'सुस्थः' इति पदस्थाने 'स्वस्थः' इति पाठभेदम् आचार्यशङ्करगौडपादौ अङ्गीकृतवन्तौ । अत्रैव आचार्य-माठरः 'सङ्गतश्च' 'स्वच्छः' इति पाठभेदद्वयमङ्गीकृतवान् । अत्र स्वस्मिन् स्थितः इति 'स्वस्थः', अथ च सत्त्वादिभिस्त्रिभिर्गुणर्हितं ज्ञानं 'स्वच्छः' इति अभिप्रायोऽस्ति ।

पाठभेदः (पाठान्तरम्) एकश्चितनीयो विषयोऽस्ति । चिन्तनेन प्रत्येकं पाठान्तरस्य सम्यगर्थमासुं समर्थो भवति अधिगमकर्त्ता । पाठान्तरेषु सम्यक्पदस्य ग्रहणार्थं पाठसम्पादनविधेरावश्यकता भवति ।

पाश्चात्यमतानुसारं पाठसम्पादनस्य त्रयो विधयः सन्ति – प्रति-लेखनपद्धत्या पाठसम्पादनम्, सन्दोहनपद्धत्या पाठसम्पादनं वंश-वृक्षपद्धत्या पाठसम्पादनश्चेति ।

अतः पाठान्तरस्य पाठभेदस्य वा सम्यग्ज्ञानाय पाठसम्पादन-मनिवार्यमस्ति । शोधलेखस्यान्ते सर्वे प्रार्थ्यन्ते यत् पाण्डुलिपेः संरक्षणमस्माभिरवश्यकर्त्तव्यम् । तद्रक्षणं कथं कुर्यात् ? इत्यस्मिन् सन्दर्भे स्वयं पाण्डुलिपिः स्वस्य रक्षणविषये वदति -

**जलाद्रक्षेत्तैलाद्रक्षेच्छिथिलबन्धनात् ।**
**मूर्खहस्ते न मां दद्यादिति वदति पुस्तकम् ॥**

**सन्दर्भग्रन्थसूचिः -**


1. श्रीमद्भगवद्गीता, गीताप्रेस गोरखपुरम्, पञ्चविंशतिपुनर्मुद्रणम्, वि.सं. – 2074
2. साङ्ख्यकारिका(माठरवृत्ति-गौडपाद-जयमङ्गला-तत्त्वकौमुदी-युक्तिदीपिका-टीकासमन्विता), श्रीमदीश्वरकृष्णः, डॉ. सुधांशुकुमारषडङ्गी (हिन्दीव्याख्याकारः) चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रथमं संस्करणम् - 2013
3. साङ्ख्यकारिका, श्रीमदीश्वरकृष्णः, डॉ. राकेशशास्त्री (व्याख्याकारः), संस्कृतग्रन्थागारः, नवदेहली, संस्करणम्- 2004
4. साङ्ख्यकारिका, श्रीमदीश्वरकृष्णः, डॉ. प्रमोदकुमारशर्मा (व्याख्याकारः), जगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालयः, जयपुरम्, प्रथमं संस्करणम्- 2007
5. साङ्ख्यकारिका, श्रीमदीश्वरकृष्णः, डॉ. रविकान्तः 'मणिः', हंसाप्रकाशनम्, जयपुरम्, प्रथमसंस्करणम् – 2018
6. साङ्ख्यकारिका की युक्तिदीपिका टीका - एक समीक्षात्मक अध्ययन, डॉ. लीलाधरवात्स्यायनः, परिमल पब्लिकेशन, देहली, प्रथमं संस्करणम्- 2012


**सन्दर्भ**

1. नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्वदर्शिभिः ॥ गीता, 2.16
2. स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ गीता, 2.54
3. मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत ॥ गीता, 14.3
4. एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी ।
नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य ॥ गीता, 11.35
5. न वेदयज्ञाध्ययनैर्न दानैर्न च क्रियाभिर्न तपोभिरुग्रैः ।
एवं रूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर ॥ गीता, 11.48
6. साङ्ख्याकारिका, 1
7. जयमङ्गला, कारिका-1 (व्याख्या) पृष्ठः - 17
8. अभिघातात् पीडनात् हेतोः इति जयमङ्गलाकारः । जयमङ्गला, भूमिका, पृष्ठः - 7
9. साङ्ख्याकारिका, 14
10. साङ्ख्याकारिका, 17
11. संहन्यन्ते मिश्रिभवन्ति अनेके विषया यस्मिन् स सङ्घातः ।
12. साङ्ख्यसूत्रम्, 1.140
13. साङ्ख्याकारिका, 21
14. साङ्ख्याकारिका, 26
15. साङ्ख्याकारिका, 27
16. साङ्ख्याकारिका, 28
17. साङ्ख्याकारिका, 29
18. साङ्ख्याकारिका, 30
19. साङ्ख्याकारिका, 31
20. परस्परं यद् आकूतं तद् एव हेतुः यत्र तां परस्पराकूतहेतुकाम् ।
21. साङ्ख्याकारिका, 34
22. साङ्ख्याकारिका, 37
23. साङ्ख्याकारिका, 50
24. साङ्ख्याकारिका, 55
25. साङ्ख्याकारिका, 56
26. साङ्ख्याकारिका, 62
27. साङ्ख्याकारिका, 65